# Yajnvalkya Gita From Mahabharat Shanti Parva

# યાજ્ઞવલ્ક્યગીતા મહાભારતે શાન્તિપર્વાન્તર્ગતા

## Document Information

Text title : yAjnyavalkyagItA mahAbhArate shantiparve adhyAya 310-318

File name : yAjnyavalkyagItAmahAbhArataShantiparva.itx

Category : gItA, giitaa

Location : doc_giitaa

Transliterated by : Tokunaga and converted for Devanagari display

Proofread by : PSA Easwaran

Description-comments : Mahabharat Shantiparva Chapter 310-318

Latest update : December 29, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 29, 2022

*sanskritdocuments.org*

# યાજ્ઞવલ્ક્યગીતા મહાભારતે શાન્તિપર્વાન્તર્ગતા

યાજ્ઞવલ્ક્યગીતા - મહાભારતે શાન્તિપર્વાન્તર્ગતા અધ્યાયાઃ ૩૧૦-૩૧૮

## ૩૧૦/૨૯૮

યુધિષ્ઠિર ઉવાચ ।
ધર્માધર્મવિમુક્તં યદ્વિમુક્તં સર્વસંશ્રયાત્ ।
જન્મમૃત્યુવિમુક્તં ચ વિમુક્તં પુણ્યપાપયોઃ ॥ ૧॥

યચ્છિવં નિત્યમભયં નિત્યં ચાક્ષરમવ્યયમ્ ।
શુચિ નિત્યમનાયાસં તદ્ભવાન્વક્તુમર્હતિ ॥ ૨॥

ભીષ્મ ઉવાચ ।
અત્ર તે વર્તયિષ્યેઽહમિતિહાસં પુરાતનમ્ ।
યાજ્ઞવલ્ક્યસ્ય સંવાદં જનકસ્ય ચ ભારત ॥ ૩॥

યાજ્ઞવલ્ક્યમૃષિશ્રેષ્ઠં દૈવરાતિર્મહાયશાઃ ।
પપ્રચ્છ જનકો રાજા પ્રશ્નં પ્રશ્નવિદાં વરઃ ॥ ૪॥

કતીન્દ્રિયાણિ વિપ્રર્ષે કતિ પ્રકૃતયઃ સ્મૃતાઃ ।
કિમવ્યક્તં પરં બ્રહ્મ તસ્માચ્ચ પરતસ્તુ કિમ્ ॥ ૫॥

પ્રભવં ચાપ્યયં ચૈવ કાલસઙ્ખ્યાં તથૈવ ચ ।
વક્તુમર્હસિ વિપ્રેન્દ્ર ત્વદનુગ્રહકાઙ્ક્ષિણઃ ॥ ૬॥

અજ્ઞાનાત્પરિપૃચ્છામિ ત્વં હિ જ્ઞાનમયો નિધિઃ ।
તદહં શ્રોતુમિચ્છામિ સર્વમેતદસંશયમ્ ॥ ૭॥

યાજ્ઞવલ્ક્ય ઉવાચ ।
શ્રૂયતામવનીપાલ યદેતદનુપૃચ્છસિ ।
યોગાનાં પરમં જ્ઞાનં સાઙ્ખ્યાનાં ચ વિશેષતઃ ॥ ૮॥

ન તવાવિદિતં કિઞ્ચિન્માં તુ જિજ્ઞાસતે ભવાન્ ।
પૃષ્ટેન ચાપિ વક્તવ્યમેષ ધર્મઃ સનાતનઃ ॥ ૯॥

અષ્ટૌ પ્રકૃતયઃ પ્રોક્તા વિકારાશ્ચાપિ ષોડશ ।
અથ સપ્ત તુ વ્યક્તાનિ પ્રાહુરધ્યાત્મચિન્તકાઃ ॥ ૧૦॥

અવ્યક્તં ચ મહાંશ્ચૈવ તથાહઙ્કાર એવ ચ ।
પૃથિવી વાયુરાકાશમાપો જ્યોતિશ્ચ પઞ્ચમમ્ ॥ ૧૧॥

એતાઃ પ્રકૃતયસ્ત્વષ્ટૌ વિકારાનપિ મે શ‍ૃણુ ।
શ્રોત્રં ત્વક્ચૈવ ચક્ષુશ્ચ જિહ્વા ઘ્રાણં ચ પઞ્ચમમ્ ॥ ૧૨॥

શબ્દસ્પર્શૌ ચ રૂપં ચ રસો ગન્ધસ્તથૈવ ચ ।
વાક્ચ હસ્તૌ ચ પાદૌ ચ પાયુર્મેઢ્રં તથૈવ ચ ॥ ૧૩॥

એતે વિશેષા રાજેન્દ્ર મહાભૂતેષુ પઞ્ચસુ ।
બુદ્ધીન્દ્રિયાણ્યથૈતાનિ સવિશેષાણિ મૈથિલ ॥ ૧૪॥

મનઃ ષોડશકં પ્રાહુરધ્યાત્મગતિચિન્તકાઃ ।
ત્વં ચૈવાન્યે ચ વિદ્વાંસસ્તત્ત્વબુદ્ધિવિશારદાઃ ॥ ૧૫॥

અવ્યક્તાચ્ચ મહાનાત્મા સમુત્પદ્યતિ પાર્થિવ ।
પ્રથમં સર્ગમિત્યેતદાહુઃ પ્રાધાનિકં બુધાઃ ॥ ૧૬॥

મહતશ્ચાપ્યહઙ્કાર ઉત્પદ્યતિ નરાધિપ ।
દ્વિતીયં સર્ગમિત્યાહુરેતદ્બુદ્ધ્યાત્મકં સ્મૃતમ્ ॥ ૧૭॥

અહઙ્કારાચ્ચ સમ્ભૂતં મનો ભૂતગુણાત્મકમ્ ।
તૃતીયઃ સર્ગ ઇત્યેષ આહઙ્કારિક ઉચ્યતે ॥ ૧૮॥

મનસસ્તુ સમુદ્ભૂતા મહાભૂતા નરાધિપ ।
ચતુર્થં સર્ગમિત્યેતન્માનસં પરિચક્ષતે ॥ ૧૯॥

શબ્દઃ સ્પર્શશ્ચ રૂપં ચ રસો ગન્ધસ્તથૈવ ચ ।
પઞ્ચમં સર્ગમિત્યાહુર્ભૌતિકં ભૂતચિન્તકાઃ ॥ ૨૦॥

શ્રોત્રં ત્વક્ચૈવ ચક્ષુશ્ચ જિહ્વા ઘ્રાણં ચ પઞ્ચમમ્ ।
સર્ગં તુ ષષ્ઠમિત્યાહુર્બહુચિન્તાત્મકં સ્મૃતમ્ ॥ ૨૧॥

અધઃ શ્રોત્રેન્દ્રિયગ્રામ ઉત્પદ્યતિ નરાધિપ ।
સપ્તમં સર્ગમિત્યાહુરેતદૈન્દ્રિયકં સ્મૃતમ્ ॥ ૨૨॥

ઊર્ધ્વસ્રોતસ્તથા તિર્યગુત્પદ્યતિ નરાધિપ ।
અષ્ટમં સર્ગમિત્યાહુરેતદાર્જવકં બુધાઃ ॥ ૨૩॥

તિર્યક્સ્રોતસ્ત્વધઃસ્રોત ઉત્પદ્યતિ નરાધિપ ।
નવમં સર્ગમિત્યાહુરેતદાર્જવકં બુધાઃ ॥ ૨૪॥

એતાનિ નવ સર્ગાણિ તત્ત્વાનિ ચ નરાધિપ ।
ચતુર્વિંશતિરુક્તાનિ યથા શ્રુતિનિદર્શનાત્ ॥ ૨૫॥

અત ઊર્ધ્વં મહારાજ ગુણસ્યૈતસ્ય તત્ત્વતઃ ।
મહાત્મભિરનુપ્રોક્તાં કાલસઙ્ખ્યાં નિબોધ મે ॥ ૨૬॥

ઇતિ શ્રીમહાભરતે શાન્તિપર્વણિ મોક્ષધર્મપર્વણિ
યાજ્ઞવલ્ક્યજનકસંવાદે દશાધિકત્રિશતતમોઽધ્યાયઃ ।

## ૩૧૧/૨૯૯

યાજ્ઞવલ્ક્ય ઉવાચ ।
અવ્યક્તસ્ય નરશ્રેષ્ઠ કાલસઙ્ખ્યાં નિબોધ મે ।
પઞ્ચ કલ્પસહસ્રાણિ દ્વિગુણાન્યહરુચ્યતે ॥ ૧॥

રાત્રિરેતાવતી ચાસ્ય પ્રતિબુદ્ધો નરાધિપ ।
સૃજત્યોષધિમેવાગ્રે જીવનં સર્વદેહિનામ્ ॥ ૨॥

તતો બ્રહ્માણમસૃજદ્ધૈરણ્યાણ્ડસમુદ્ભવમ્ ।
સા મૂર્તિઃ સર્વભૂતાનામિત્યેવમનુશુશ્રુમ ॥ ૩॥

સંવત્સરમુષિત્વાણ્ડે નિષ્ક્રમ્ય ચ મહામુનિઃ ।
સન્દધેઽર્ધં મહીં કૃત્સ્નાં દિવમર્ધં પ્રજાપતિઃ ॥ ૪॥

દ્યાવાપૃથિવ્યોરિત્યેષ રાજન્વેદેષુ પઠ્યતે ।
તયોઃ શકલયોર્મધ્યમાકાશમકરોત્પ્રભુઃ ॥ ૫॥

એતસ્યાપિ ચ સઙ્ખ્યાનં વેદવેદાઙ્ગપારગૈઃ ।
દશ કલ્પસહસ્રાણિ પાદોનાન્યહરુચ્યતે ।
રાત્રિમેતાવતીં ચાસ્ય પ્રાહુરધ્યાત્મચિન્તકાઃ ॥ ૬॥

સૃજત્યહઙ્કારમૃષિર્ભૂતં દિવ્યાત્મકં તથા ।

ચતુરશ્ચાપરાન્પુત્રાન્દેહાત્પૂર્વં મહાનૃષિઃ ।
તે વૈ પિતૃભ્યઃ પિતરઃ શ્રૂયન્તે રાજસત્તમ ॥ ૭॥

દેવાઃ પિતૃણાં ચ સુતા દેવૈર્લોકાઃ સમાવૃતાઃ ।
ચરાચરા નરશ્રેષ્ઠ ઇત્યેવમનુશુશ્રુમ ॥ ૮॥

પરમેષ્ઠી ત્વહઙ્કારોઽસૃજદ્ભૂતાનિ પઞ્ચધા ।
પૃથિવી વાયુરાકાશમાપો જ્યોતિશ્ચ પઞ્ચમમ્ ॥ ૯॥

એતસ્યાપિ નિશામાહુસ્તૃતીયમિહ કુર્વતઃ ।
પઞ્ચ કલ્પસહસ્રાણિ તાવદેવાહરુચ્યતે ॥ ૧૦॥

શબ્દઃ સ્પર્શશ્ચ રૂપં ચ રસો ગન્ધશ્ચ પઞ્ચમઃ ।
એતે વિશેષા રાજેન્દ્ર મહાભૂતેષુ પઞ્ચસુ ।
યૈરાવિષ્ટાનિ ભૂતાનિ અહન્યહનિ પાર્થિવ ॥ ૧૧॥

અન્યોન્યં સ્પૃહયન્ત્યેતે અન્યોન્યસ્ય હિતે રતાઃ ।
અન્યોન્યમભિમન્યન્તે અન્યોન્યસ્પર્ધિનસ્તથા ॥ ૧૨॥

તે વધ્યમાના અન્યોન્યં ગુણૈર્હારિભિરવ્યયાઃ । (ગુણૈર્હારિભિરવ્યયૈઃ)
ઇહૈવ પરિવર્તન્તે તિર્યગ્યોનિપ્રવેશિનઃ ॥ ૧૩॥

ત્રીણિ કલ્પસહસ્રાણિ એતેષામહરુચ્યતે ।
રત્રિરેતાવતી ચૈવ મનસશ્ચ નરાધિપ ॥ ૧૪॥

મનશ્ચરતિ રાજેન્દ્ર ચરિતં સર્વમિન્દ્રિયૈઃ ।
ન ચેન્દ્રિયાણિ પશ્યન્તિ મન એવાત્ર પશ્યતિ ॥ ૧૫॥ (મન એવાનુપશ્યતિ)

ચક્ષુઃ પશ્યતિ રૂપાણિ મનસા તુ ન ચક્ષુષા ।
મનસિ વ્યાકુલે ચક્ષુઃ પશ્યન્નપિ ન પશ્યતિ ।
તથેન્દ્રિયાણિ સર્વાણિ પશ્યન્તીત્યભિચક્ષતે ॥ ૧૬॥

(ન ચેન્દ્રિયાણિ પશ્યન્તિ મન એવાત્ર પશ્યતિ ।)
મનસ્યુપરતે રાજન્નિન્દ્રિયોપરમો ભવેત્ ।
ન ચેન્દ્રિયવ્યુપરમે મનસ્યુપરમો ભવેત્ ।
એવં મનઃ પ્રધાનાનિ ઇન્દ્રિયાણિ વિભાવયેત્ ॥ ૧૭॥ (પ્રભાવયેત્ )

ઇન્દ્રિયાણાં હિ સર્વેષામીશ્વરં મન ઉચ્યતે ।
એતદ્વિશન્તિ ભૂતાનિ સર્વાણીહ મહાયશઃ ॥ ૧૮॥

ઇતિ શ્રીમહાભરતે શાન્તિપર્વણિ મોક્ષધર્મપર્વણિ
યાજ્ઞવલ્ક્યજનકસંવાદે એકાદશાધિકત્રિશતતમોઽધ્યાયઃ ।

## ૩૧૨/૩૦૦

યાજ્ઞવલ્ક્ય ઉવાચ ।
તત્ત્વાનાં સર્ગસઙ્ખ્યા ચ કાલસઙ્ખ્યા તથૈવ ચ ।
મયા પ્રોક્તાનુપૂર્વ્યેણ સંહારમપિ મે શ ृણુ ॥ ૧॥

યથા સંહરતે જન્તૂન્સસર્જ ચ પુનઃ પુનઃ ।
અનાદિનિધનો બ્રહ્મા નિત્યશ્ચાક્ષર એવ ચ ॥ ૨॥

અહઃ ક્ષયમથો બુદ્ધ્વા નિશિ સ્વપ્નમનાસ્તથા ।
ચોદયામાસ ભવગાનવ્યક્તોઽહઙ્કૃતં નરમ્ ॥ ૩॥

તતઃ શતસહસ્રાંશુરવ્યક્તેનાભિચોદિતઃ ।
કૃત્વા દ્વાદશધાઽઽત્માનમાદિત્યો જ્વલદગ્નિવત્ ॥ ૪॥

ચતુર્વિધં પ્રજાજાલં નિર્દહત્યાશુ તેજસા ।
જરાય્વણ્ડસ્વેદજાતમુદ્ભિજ્જં ચ નરાધિપ ॥ ૫॥

એતદુન્મેષમાત્રેણ વિનિષ્ટં સ્થાણુ જઙ્ગમમ્ ।
કૂર્મપૃષ્ઠસમા ભૂમિર્ભવત્યથ સમન્તતઃ ॥ ૬॥

જગદ્ગ્ધ્વામિતબલઃ કેવલાં જગતીં તતઃ ।
અમ્ભસા બલિના ક્ષિપ્રમાપૂર્યત સમન્તતઃ ॥ ૭॥

તતઃ કાલાગ્નિમાસાદ્ય તદમ્ભો યાતિ સઙ્ક્ષયમ્ ।
વિનષ્ટેઽમ્ભસિ રાજેન્દ્ર જાજ્વલત્યનલો મહાન્ ॥ ૮॥

તમપ્રમેયોઽતિબલં જ્વલમાનં વિભાવસુમ્ ।
ઊષ્માણં સર્વભૂતાનાં સપ્તાર્ચિષમથાઞ્જસા ॥ ૯॥

ભક્ષયામાસ બલવાન્વાયુરષ્ટાત્મકો બલી ।
વિચરન્નમિતપ્રાણસ્તિર્યગૂર્ધ્વમધસ્તથા ॥ ૧૦॥

તમપ્રતિબલં ભીમમાકાશં ગ્રસતેઽઽત્મના ।
આકાશમપ્યભિનદન્મનો ગ્રસતિ ચાધિકમ્ ॥ ૧૧॥

મનો ગ્રસતિ સર્વાત્મા સોઽહઙ્કારઃ પ્રજાપતિઃ ।

અહઙ્કારં મહાનાત્મા ભૂતભવ્યભવિષ્યવિત્ ॥ ૧૨॥

તમપ્યનુપમાત્માનં વિશ્વં શમ્ભુઃ પ્રજાપતિઃ ।
અણિમા લઘિમા પ્રાપ્તિરીશાનો જ્યોતિરવ્યયઃ ॥ ૧૩॥

સર્વતઃ પાણિપાદાન્તઃ સર્વતોઽક્ષિશિરોમુખઃ ।
સર્વતઃ શ્રુતિમાઁલ્લોકે સર્વમાવૃત્ય તિષ્ઠતિ ॥ ૧૪॥

હૃદયં સર્વભૂતાનાં પર્વણાઙ્ગુષ્ઠમાત્રકઃ ।
અનુગ્રસત્યનન્તં હિ મહાત્મા વિશ્વમીશ્વરઃ ॥ ૧૫॥

તતઃ સમભવત્સર્વમક્ષયાવ્યયમવ્રણમ્ ।
ભૂતભવ્યભવિષ્યાણાં સ્રષ્ટારમનઘં તથા ॥ ૧૬॥

એષોઽપ્યયસ્તે રાજેન્દ્ર યથાવત્પરિભાસિતઃ ।
અધ્યાત્મમધિભૂતં ચ અધિદૈવં ચ શ્રૂયતામ્ ॥ ૧૭॥

ઇતિ શ્રીમહાભરતે શાન્તિપર્વણિ મોક્ષધર્મપર્વણિ
યાજ્ઞવલ્ક્યજનકસંવાદે દ્વાદશાધિકત્રિશતતમોઽધ્યાયઃ ।

## ૩૧૩/૩૦૧

યાજ્ઞવલ્ક્ય ઉવાચ ।
પાદાવધ્યાત્મમિત્યાહુર્બ્રાહ્મણાસ્તત્ત્વદર્શિનઃ ।
ગન્તવ્યમધિભૂતં ચ વિષ્ણુસ્તત્રાધિદૈવતમ્ ॥ ૧॥

પાયુરધ્યાત્મમિત્યાહુર્યથાતત્ત્વાર્થ દર્શિનઃ ।
વિસર્ગમધિભૂતં ચ મિત્રસ્તત્રાધિદૈવતમ્ ॥ ૨॥

ઉપસ્થોઽધ્યાત્મમિત્યાહુર્યથાયોગનિદર્શનમ્ ।
અધિભૂતં તથાનન્દો દૈવતં ચ પ્રજાપતિઃ ॥ ૩॥

હસ્તાવધ્યાત્મમિત્યાહુર્યથા સાઙ્ખ્યનિદર્શનમ્ ।
કર્તવ્યમધિભૂતં તુ ઇન્દ્રસ્તત્રાધિદૈવતમ્ ॥ ૪॥

વાગધ્યાત્મમિતિ પ્રાહુર્યથા શ્રુતિનિદર્શનમ્ ।
વક્તવ્યમધિભૂતં તુ વહ્નિસ્તત્રાધિદૈવતમ્ ॥ ૫॥

ચક્ષુરધ્યાત્મમિત્યાહુર્યથા શ્રુતિનિદર્શનમ્ ।
રૂપમત્રાધિભૂતં તુ સૂર્યસ્તત્રાધિદૈવતમ્ ॥ ૬॥

શ્રોત્રમધ્યાત્મમિત્યાહુર્યથા શ્રુતિનિદર્શનમ્ ।
શબ્દસ્તત્રાધિભૂતં તુ દિશસ્તત્રાધિદૈવતમ્ ॥ ૭॥

જિહ્વામધ્યાત્મમિત્યાહુર્યથાતત્ત્વનિદર્શનમ્ ।
રસ એવાધિભૂતં તુ આપસ્તત્રાધિદૈવતમ્ ॥ ૮॥

ઘ્રાણમધ્યાત્મમિત્યાહુર્યથા શ્રુતિનિદર્શનમ્ ।
ગન્ધ એવાધિભૂતં તુ પૃથિવી ચાધિદૈવતમ્ ॥ ૯॥

ત્વગધ્યાત્મમિતિ પ્રાહુસ્તત્ત્વબુદ્ધિવિશારદાઃ ।
સ્પર્શ એવાધિભૂતં તુ પવનશ્ચાધિદૈવતમ્ ॥ ૧૦॥

મનોઽધ્યાત્મમિતિ પ્રાહુર્યથા શ્રુતિનિદર્શનમ્ ।
મન્તવ્યમધિભૂતં તુ ચન્દ્રમાશ્ચાધિદૈવતમ્ ॥ ૧૧॥

અહઙ્કારિકમધ્યાત્મમાહુસ્તત્ત્વનિદર્શનમ્ ।
અભિમાનોઽધિભૂતં તુ ભવસ્તત્રાધિદૈવતમ્ ॥ ૧૨॥

બુદ્ધિરધ્યાત્મમિત્યાહુર્યથા વેદનિદર્શનમ્ ।
બોદ્ધવ્યમધિભૂતં તુ ક્ષેત્રજ્ઞોઽત્રાધિદૈવતમ્ ॥ ૧૩॥

એષા તે વ્યક્તતો રાજન્વિભૂતિરનુવર્ણિતા ।
આદૌ મધ્યે તથા ચાન્તે યથાતત્ત્વેન તત્ત્વવિત્ ॥ ૧૪॥

પ્રકૃતિર્ગુણાન્વિકુરુતે સ્વચ્છન્દેનાત્મકામ્યયા ।
ક્રીડાર્થં તુ મહારાજ શતશોઽથ સહસ્રશઃ ॥ ૧૫॥

યથા દીપસહસ્રાણિ દીપાન્મર્ત્યાઃ પ્રકુર્વતે ।
પ્રકૃતિસ્તથા વિકુરુતે પુરુષસ્ય ગુણાન્બહૂન્ ॥ ૧૬॥

સત્ત્વમાનન્દ ઉદ્રેકઃ પ્રીતિઃ પ્રાકાશ્યમેવ ચ ।
સુખં શુદ્ધિત્વમારોગ્યં સન્તોષઃ શ્રદ્દધાનતા ॥ ૧૭॥

અકાર્પણ્યમસંરમ્ભઃ ક્ષમા ધૃતિરહિંસતા ।
સમતા સત્યમાનૃણ્યં માર્દવં હ્રીરચાપલમ્ ॥ ૧૮॥

શૌચમાર્જવમાચારમલૌલ્યં હૃદ્યસમ્ભ્રમઃ ।
ઇષ્ટાનિષ્ટવિયોગાનાં કૃતાનામવિકત્થનમ્ ॥ ૧૯॥

દાનેન ચાનુગ્રહણમસ્પૃહાર્થે પરાર્થતા ।

સર્વભૂતદયા ચૈવ સત્ત્વસ્યૈતે ગુણાઃ સ્મૃતાઃ ॥ ૨૦॥

રજોગુણાનાં સઙ્ઘાતો રૂપમૈશ્વર્યવિગ્રહે ।
અત્યાશિત્વમકારુણ્યં સુખદુઃખોપસેવનમ્ ॥ ૨૧॥

પરાપવાદેષુ રતિર્વિવાદાનાં ચ સેવનમ્ ।
અહઙ્કારસ્ત્વસત્કારશ્ચિન્તા વૈરોપસેવનમ્ ॥ ૨૨॥

પરિતાપોઽભિહરણં હ્રીનાશોઽનાર્જવં તથા ।
ભેદઃ પરુષતા ચૈવ કામક્રોધૌ મદસ્તથા ।
દર્પો દ્વેષોઽતિવાદશ્ચ એતે પ્રોક્તા રજોગુણાઃ ॥ ૨૩॥

તામસાનાં તુ સઙ્ઘાતં પ્રવક્ષ્યામ્યુપધાર્યતામ્ ।
મોહોઽપ્રકાશસ્તામિસ્રમન્ધતામિસ્રસંજ્ઞિતમ્ ॥ ૨૪॥

મરણં ચાન્ધતામિસ્રં તામિસ્રં ક્રોધ ઉચ્યતે ।
તમસો લક્ષણાનીહ ભક્ષણાદ્યભિરોચનમ્ ॥ ૨૫॥

ભોજનાનામપર્યાપ્તિસ્તથા પેયેષ્વતૃપ્તતા ।
ગન્ધવાસો વિહારેષુ શયનેષ્વાસનેષુ ચ ॥ ૨૬॥

દિવાસ્વપ્ને વિવાદે ચ પ્રમાદેષુ ચ વૈ રતિઃ ।
નૃત્યવાદિત્રગીતાનામજ્ઞાનાચ્છ્રદ્દધાનતા ।
દ્વેષો ધર્મવિશેષાણામેતે વૈ તામસા ગુણાઃ ॥ ૨૭॥

ઇતિ શ્રીમહાભરતે શાન્તિપર્વણિ મોક્ષધર્મપર્વણિ
યાજ્ઞવલ્ક્યજનકસંવાદે ત્રયોદશાધિકત્રિશતતમોઽધ્યાયઃ ।

## ૩૧૪/૩૦૨

યાજ્ઞવલ્ક્ય ઉવાચ ।
એતે પ્રધાનસ્ય ગુણાસ્ત્રયઃ પુરુષસત્તમ ।
કૃત્સ્નસ્ય ચૈવ જગતસ્તિષ્ઠન્ત્યનપગાઃ સદા ॥ ૧॥

શતધા સહસ્રધા ચૈવ તથા શતસહસ્રધા ।
કોટિશશ્ચ કરોત્યેષ પ્રત્યગાત્માનમાત્મના ॥ ૨॥

સાત્ત્વિકસ્યોત્તમં સ્થાનં રાજસસ્યેહ મધ્યમમ્ ।
તામસસ્યાધમં સ્થાનં પ્રાહુરધ્યાત્મચિન્તકાઃ ॥ ૩॥

કેવલેનેહ પુણ્યેન ગતિમૂર્ધ્વામવાપ્નુયાત્ ।
પુણ્યપાપેન માનુષ્યમધર્મેણાપ્યધોગતિમ્ ॥ ૪॥

દ્વન્દ્વમેષાં ત્રયાણાં તુ સન્નિપાતં ચ તત્ત્વતઃ ।
સત્ત્વસ્ય રજસશ્ચૈવ તમસશ્ચ શ‍ૃણુષ્વ મે ॥ ૫॥

સત્ત્વસ્ય તુ રજો દૃષ્ટં રજસશ્ચ તમસ્તથા ।
તમસશ્ચ તથા સત્ત્વં સત્ત્વસ્યાવ્યક્તમેવ ચ ॥ ૬॥

અવ્યક્તસત્ત્વસંયુક્તો દેવલોકમવાપ્નુયાત્ ।
રજઃસત્ત્વસમાયુક્તો મનુષ્યેષૂપપદ્યતે ॥ ૭॥

રજસ્તમોભ્યાં સંયુક્તસ્તિર્યગ્યોનિષુ જાયતે ।
રજસ્તામસસત્ત્વૈશ્ચ યુક્તો માનુષ્યમાપ્નુયાત્ ॥ ૮॥

પુણ્યપાપવિયુક્તાનાં સ્થાનમાહુર્મનીષિણામ્ ।
શાસ્વતં ચાવ્યયં ચૈવ અક્ષરં ચાભયં ચ યત્ ॥ ૯॥

જ્ઞાનિનાં સમ્ભવં શ્રેષ્ઠં સ્થાનમવ્રણમચ્યુતમ્ ।
અતીન્દ્રિયમબીજં ચ જન્મમૃત્યુતમોનુદમ્ ॥ ૧૦॥

અવ્યક્તસ્થં પરં યત્તત્પૃષ્ટસ્તેઽહં નરાધિપ ।
સ એષ પ્રકૃતિસ્થો હિ તસ્થુરિત્યભિધીયતે ॥ ૧૧॥

અચેતનશ્ચૈષ મતઃ પ્રકૃતિસ્થશ્ચ પાર્થિવ ।
એતેનાધિષ્ઠિતશ્ચૈવ સૃજતે સંહરત્યપિ ॥ ૧૨॥

જનક ઉવાચ ।
અનાદિનિધનાવેતાવુભાવેવ મહામુને ।
અમૂર્તિમન્તાવચલાવપ્રકમ્પ્યૌ ચ નિર્વ્રણૌ ॥ ૧૩॥

અગ્રાહ્યાવૃષિશાર્દૂલ કથમેકો હ્યચેતનઃ ।
ચેતનાવાંસ્તથા ચૈકઃ ક્ષેત્રજ્ઞ ઇતિ ભાષિતઃ ॥ ૧૪॥

ત્વં હિ વિપ્રેન્દ્ર કાર્ત્સ્ન્યેન મોક્ષધર્મમુપાસસે ।
સાકલ્યં મોક્ષધર્મસ્ય શ્રોતુમિચ્છામિ તત્ત્વતઃ ॥ ૧૫॥

અસ્તિત્વં કેવલત્વં ચ વિનાભાવં તથૈવ ચ ।
તથૈવોત્ક્રમણસ્થાનં દેહિનોઽપિ વિયુજ્યતઃ ॥ ૧૬॥

કાલેન યદ્ધિ પ્રાપ્નોતિ સ્થાનં તદ્બ્રૂહિ મે દ્વિજ ।

સાઙ્ખ્યજ્ઞાનં ચ તત્ત્વેન પૃથગ્યોગં તથૈવ ચ ॥ ૧૭॥

અરિષ્ટાનિ ચ તત્ત્વેન વક્તુમર્હસિ સત્તમ ।
વિદિતં સર્વમેતત્તે પાણાવામલકં યથા ॥ ૧૮॥

ઇતિ શ્રીમહાભરતે શાન્તિપર્વણિ મોક્ષધર્મપર્વણિ
યાજ્ઞવલ્ક્યજનકસંવાદે ચતુર્દશાધિકત્રિશતતમોઽધ્યાયઃ ।

## ૩૧૫/૩૦૩

યાજ્ઞવલ્ક્ય ઉવાચ
ન શક્યો નિર્ગુણસ્તાત ગુણીકર્તું વિશામ્પતે ।
ગુણવાંશ્ચાપ્યગુણવાન્ યથાતત્ત્વં નિબોધ મે ॥ ૧॥

ગુણૈર્હિ ગુણવાનેવ નિર્ગુણશ્ચાગુણસ્તથા ।
પ્રાહુરેવં મહાત્માનો મુનયસ્તત્ત્વદર્શિનઃ ॥ ૨॥

ગુણસ્વભાવસ્ત્વવ્યક્તો ગુણાન્ નૈવાભિવર્તતે ।
ઉપયુઙ્ક્તે ચ તાનેવ સ ચૈવાજ્ઞઃ સ્વભાવતઃ ॥ ૩॥

અવ્યક્તસ્તુ ન જાનીતે પુરુષો જ્ઞઃ સ્વભાવતઃ ।
ન મત્તઃ પરમોઽસ્તીતિ નિત્યમેવાભિમન્યતે ॥ ૪॥

અનેન કારણેનૈતદવ્યક્તં સ્યાદચેતનમ્ ।
નિત્યત્વાદક્ષરત્વાચ્ચ ક્ષરાણાં તત્ત્વતોઽન્યથા ॥ ૫॥

યદાજ્ઞાનેન કુર્વીત ગુણસર્ગં પુનઃ પુનઃ ।
યદાઽઽત્માનં ન જાનીતે તદાવ્યક્તમિહોચ્યતે ॥ ૬॥

કર્તૃત્વાચ્ચાપિ તત્ત્વાનાં તત્ત્વધર્મી તથોચ્યતે ।
કર્તૃત્વાચ્ચૈવ યોનીનાં યોનિધર્મા તથોચ્યતે ॥ ૭॥

કર્તૃત્વાત્પ્રકૃતીનાં તુ તથા પ્રકૃતિધર્મિતા ।
કર્તૃત્વાચ્ચાપિ બીજાનાં બીજધર્મા તથોચ્યતે ॥ ૮॥

ગુણાનાં પ્રસવત્વાચ્ચ તથા પ્રસવધર્મવાન્ ।
કર્તૃત્વાત્પ્રલયાનાં ચ તથા પ્રલય ધર્મિતા ॥ ૯॥

બીલત્વાત્પ્રકૃતિત્વાચ્ચ પ્રલયત્વાત્તથૈવ ચ ।
ઉપેક્ષકત્વાદન્યત્વાદભિમાનાચ્ચ કેવલમ્ ॥ ૧૦॥

મન્યન્તે યતયઃ શુદ્ધા અધ્યાત્મવિગતજ્વરાઃ ।
અનિત્યં નિત્યમવ્યક્તમેવમેતદ્ધિ શુશ્રુમ ॥ ૧૧॥

અવ્યક્તૈકત્વમિત્યાહુર્નાનાત્વં પુરુષસ્તથા ।
સર્વભૂતદયાવન્તઃ કેવલં જ્ઞાનમાસ્થિતાઃ ॥ ૧૨॥

અન્યઃ સ પુરુષોઽવ્યક્તસ્ત્વધ્રુવો ધ્રુવસંજ્ઞિકઃ ।
યથા મુઞ્જ ઇષીકાયાસ્તથૈવૈતદ્ધિ જાયતે ॥ ૧૩॥

અન્યં ચ મશકં વિદ્યાદન્યચ્ચોદુમ્બરં તથા ।
ન ચોદુમ્બર સંયોગૈર્મશકસ્તત્ર લિપ્યતે ॥ ૧૪॥

અન્ય એવ તથા મત્સ્યસ્તથાન્યદુદકં સ્મૃતમ્ ।
ન ચોદકસ્ય સ્પર્શેન મત્સ્યો લિપ્યતિ સર્વશઃ ॥ ૧૫॥

અન્યો હ્યગ્નિરુખાપ્યન્યા નિત્યમેવમવૈહિ ભોઃ ।
ન ચોપલિપ્યતે સોઽગ્નિરુખા સંસ્પર્શનેન વૈ ॥ ૧૬॥

પુષ્કરં ત્વન્યદેવાત્ર તથાન્યદુદકં સ્મૃતમ્ ।
ન ચોદકસ્ય સ્પર્શેન લિપ્યતે તત્ર પુષ્કરમ્ ॥ ૧૭॥

એતેષાં સહ સંવાસં વિવાસં ચૈવ નિત્યશઃ ।
યથાતથૈનં પશ્યન્તિ ન નિત્યં પ્રાકૃતા જનાઃ ॥ ૧૮॥

યે ત્વન્યથૈવ પશ્યન્તિ ન સમ્યક્તેષુ દર્શનમ્ ।
તે વ્યક્તં નિરયં ઘોરં પ્રવિશન્તિ પુનઃ પુનઃ ॥ ૧૯॥

સાઙ્ખ્યદર્શનમેતત્તે પરિસઙ્ખ્યાતમુત્તમમ્ ।
એવં હિ પરિસઙ્ખ્યાય સાઙ્ખ્યાઃ કેવલતાં ગતાઃ ॥ ૨૦॥

યે ત્વન્યે તત્ત્વકુશલાસ્તેષામેતન્નિદર્શનમ્ ।
અતઃ પરં પ્રવક્ષ્યામિ યોગાનામપિ દર્શનમ્ ॥ ૨૧॥

ઇતિ શ્રીમહાભરતે શાન્તિપર્વણિ મોક્ષધર્મપર્વણિ
યાજ્ઞવલ્ક્યજનકસંવાદે પઞ્ચદશાધિકત્રિશતતમોઽધ્યાયઃ ।

## ૩૧૬/૩૦૪

યાજ્ઞવલ્ક્ય ઉવાચ ।
સાઙ્ખ્યજ્ઞાનં મયા પ્રોક્તં યોગજ્ઞાનં નિબોધ મે ।
યથા શ્રુતં યથાદૃષ્ટં તત્ત્વેન નૃપસત્તમ ॥ ૧॥

નાસ્તિ સાઙ્ક્યસમં જ્ઞાનં નાસ્તિ યોગસમં બલમ્ ।
તાવુભાવેકચર્યૌ તુ ઉભાવનિધનૌ સ્મૃતૌ ॥ ૨॥

પૃથક્પૃથક્તુ પશ્યન્તિ યેઽલ્પબુદ્ધિરતા નરાઃ ।
વયં તુ રાજન્પશ્યામ એકમેવ તુ નિશ્ચયાત્ ॥ ૩॥

યદેવ યોગાઃ પશ્યન્તિ તત્સાઙ્ખ્યૈરપિ દૃશ્યતે ।
એકં સાઙ્ક્યં ચ યોગં ચ યઃ પશ્યતિ સ તત્ત્વવિત્ ॥ ૪॥

રુદ્રપ્રધાનાનપરાન્વિદ્ધિ યોગાન્પરન્તપ ।
તેનૈવ ચાથ દેહેન વિચરન્તિ દિશો દશ ॥ ૫॥

યાવદ્ધિ પ્રલયસ્તાત સૂક્ષ્મેણાષ્ટગુણેન વૈ ।
યોગેન લોકાન્વિચરન્સુખં સંન્યસ્ય ચાનઘ ॥ ૬॥

વેદેષુ ચાષ્ટગુણિતં યોગમાહુર્મનીષિણઃ ।
સૂક્ષ્મમષ્ટગુણં પ્રાહુર્નેતરં નૃપસત્તમ ॥ ૭॥

દ્વિગુણં યોગકૃત્યં તુ યોગાનાં પ્રાહુરુત્તમમ્ ।
સગુણં નિર્ગુણં ચૈવ યથાશાસ્ત્રનિદર્શનમ્ ॥ ૮॥

ધારણા ચૈવ મનસઃ પ્રાણાયામશ્ચ પાર્થિવ ।
પ્રાણાયામો હિ સગુણો નિર્ગુણં ધારણં મનઃ ॥ ૯॥

યત્ર દૃશ્યેત મુઞ્ચન્વૈ પ્રાણાન્મૈથિલસત્તમ ।
વાતાધિક્યં ભવત્યેવ તસ્માદ્ધિ ન સમાચરેત્ ॥ ૧૦॥

નિશાયાઃ પ્રથમે યામે ચોદના દ્વાદશ સ્મૃતાઃ ।
મધ્યે સુપ્ત્વા પરે યામે દ્વાદશૈવ તુ ચોદનાઃ ॥ ૧૧॥

તદેવમુપશાન્તેન દાન્તેનૈકાન્તશીલિના ।
આત્મારામેણ બુદ્ધેન યોક્તવ્યોઽઽત્મા ન સંશયઃ ॥ ૧૨॥

પઞ્ચાનામિન્દ્રિયાણાં તુ દોષાનાક્ષિપ્ય પઞ્ચધા ।
શબ્દં સ્પર્શં તથા રૂપં રસં ગન્ધં તથૈવ ચ ॥ ૧૩॥

પ્રતિભામપવર્ગં ચ પ્રતિસંહૃત્ય મૈથિલ ।
ઇન્દ્રિયગ્રામમખિલં મનસ્યભિનિવેશ્ય હ ॥ ૧૪॥

મનસ્તથૈવાહઙ્કારે પ્રતિષ્ઠાપ્ય નરાધિપ ।
અહઙ્કારં તથા બુદ્ધૌ બુદ્ધિં ચ પ્રકૃતાવપિ ॥ ૧૫॥

એવં હિ પરિસઙ્ખ્યાય તતો ધ્યાયેત કેવલમ્ ।
વિરજસ્કમલં નિત્યમનન્તં શુદ્ધમવ્રણમ્ ॥ ૧૬॥

તસ્થુષં પુરુષં સત્ત્વમભેદ્યમજરામરમ્ ।
શાશ્વતં ચાવ્યયં ચૈવ ઈશાનં બ્રહ્મ ચાવ્યયમ્ ॥ ૧૭॥

યુક્તસ્ય તુ મહારાજ લક્ષણાન્યુપધારયેત્ ।
લક્ષણં તુ પ્રસાદસ્ય યથા તૃપ્તઃ સુખં સ્વપેત્ ॥ ૧૮॥

નિવાતે તુ યથા દીપો જ્વલેત્સ્નેહસમન્વિતઃ ।
નિશ્ચલોર્ધ્વશિખસ્તદ્વદ્યુક્તમાહુર્મનીષિણઃ ॥ ૧૯॥

પાષાણ ઇવ મેઘોત્થૈર્યથા બિન્દુભિરાહતઃ ।
નાલં ચાલયિતું શક્યસ્તથાયુક્તસ્ય લક્ષણમ્ ॥ ૨૦॥

શઙ્ખદુન્દુભિનિર્ઘોષૈર્વિવિધૈર્ગીતવાદિતૈઃ ।
ક્રિયમાણૈર્ન કમ્પેત યુક્તસ્યૈતન્નિદર્શનમ્ ॥ ૨૧॥

તૈલપાત્રં યથા પૂર્ણં કરાભ્યાં ગૃહ્ય પૂરુષઃ ।
સોપાનમારુહેદ્ભીતસ્તર્જ્યમાનોઽસિ પાણિભિઃ ॥ ૨૨॥

સંયતાત્મા ભયાત્તેષાં ન પાત્રાદ્બિન્દુમુત્સૃજેત્ ।
તથૈવોત્તરમાણસ્ય એકાગ્રમનસસ્તથા ॥ ૨૩॥

સ્થિરત્વાદિન્દ્રિયાણાં તુ નિશ્ચલત્વાત્તથૈવ ચ ।
એવં યુક્તસ્ય તુ મુનેર્લક્ષણાન્યુપધારયેત્ ॥ ૨૪॥

સ યુક્તઃ પશ્યતિ બ્રહ્મ યત્તત્પરમમવ્યયમ્ ।
મહતસ્તમસો મધ્યે સ્થિતં જ્વલનસન્નિભમ્ ॥ ૨૫॥

એતેન કેવલં યાતિ ત્યક્ત્વા દેહમસાક્ષિકમ્ ।
કાલેન મહતા રાજઞ્છ્રુતિરેષા સનાતની ॥ ૨૬॥

એતદ્ધિ યોગં યોગાનાં કિમન્યદ્યોગલક્ષણમ્ ।

વિજ્ઞાય તદ્ધિ મન્યન્તે કૃતકૃત્યા મનીષિણઃ ॥ ૨૭॥

ઇતિ શ્રીમહાભરતે શાન્તિપર્વણિ મોક્ષધર્મપર્વણિ
યાજ્ઞવલ્ક્યજનકસંવાદે ષોડશાધિકત્રિશતતમોઽધ્યાયઃ ।

## ૩૧૭/૩૦૫

યાજ્ઞવલ્ક્ય ઉવાચ ।
તથૈવોત્ક્રમમાણં તુ શૃણુષ્વાવહિતો નૃપ ।
પદ્ભ્યામુત્ક્રમમાણસ્ય વૈષ્ણવં સ્થાનમુચ્યતે ॥ ૧॥

જઙ્ઘાભ્યાં તુ વસૂન્દેવાનાપ્નુયાદિતિ નઃ શ્રુતમ્ ।
જાનુભ્યાં ચ મહાભાગાન્દેવાન્સાધ્યાનવાપ્નુયાત્ ॥ ૨॥

પાયુનોત્ક્રમમાણસ્તુ મૈત્રં સ્થાનમવાપ્નુયાત્ ।
પૃથિવીં જઘનેનાથ ઊરુભ્યાં તુ પ્રજાપતિમ્ ॥ ૩॥

પાર્શ્વાભ્યાં મરુતો દેવાન્નાસાભ્યામિન્દુમેવ ચ ।
બાહુભ્યામિન્દ્રમિત્યાહુરુરસા રુદ્રમેવ ચ ॥ ૪॥

ગ્રીવાયાસ્તમૃષિશ્રેષ્ઠં નરમાપ્નોત્યનુત્તમમ્ ।
વિશ્વેદેવાન્મુખેનાથ દિશઃ શ્રોત્રેણ ચાપ્નુયાત્ ॥ ૫॥

ઘ્રાણેન ગન્ધવહનં નેત્રાભ્યાં સૂર્યમેવ ચ ।
ભ્રૂભ્યાં ચૈવાશ્વિનૌ દેવૌ લલાટેન પિતૄનથ ॥ ૬॥

બ્રહ્માણમાપ્નોતિ વિભું મૂર્ધ્ના દેવાગ્રજં તથા ।
એતાન્યુત્ક્રમણસ્થાનાન્યુક્તાનિ મિથિલેશ્વર ॥ ૭॥

અરિષ્ટાનિ તુ વક્ષ્યામિ વિહિતાનિ મનીષિભિઃ ।
સંવત્સરવિયોગસ્ય સમ્ભવેયુઃ શરીરિણઃ ॥ ૮॥

યોઽરુન્ધતીં ન પશ્યેત દૃષ્ટપૂર્વાં કદાચન ।
તથૈવ ધ્રુવમિત્યાહુઃ પૂર્ણેન્દું દીપમેવ ચ ।
ખણ્ડાભાસં દક્ષિણતસ્તેઽપિ સંવત્સરાયુષઃ ॥ ૯॥

પરચક્ષુષિ ચાત્માનં યે ન પશ્યન્તિ પાર્થિવ ।
આત્મછાયાઽઽકૃતીભૂતં તેઽપિ સંવત્સરાયુષઃ ॥ ૧૦॥

અતિદ્યુતિરતિપ્રજ્ઞા અપ્રજ્ઞા ચાદ્યુતિસ્તથા ।

પ્રકૃતેર્વિક્રિયાપત્તિઃ ષણ્માસાન્મૃત્યુલક્ષણમ્ ॥ ૧૧॥

દૈવતાન્યવજાનાતિ બ્રાહ્મણૈશ્ચ વિરુધ્યતે ।
કૃષ્ણશ્યાવચ્છવિચ્છાયઃ ષણ્માસાન્મૃત્યુલક્ષણમ્ ॥ ૧૨॥

શીર્ણનાભિ યથા ચક્રં છિદ્રં સોમં પ્રપશ્યતિ ।
તથૈવ ચ સહસ્રાંશું સપ્તરાત્રેણ મૃત્યુભાક્ ॥ ૧૩॥

શવગન્ધમુપાઘ્રાતિ સુરભિં પ્રાપ્ય યો નરઃ ।
દેવતાયતનસ્થસ્તુ ષડ્રાત્રેણ સ મૃત્યુભાક્ ॥ ૧૪॥

કર્ણનાસાવનમનં દન્તદૃષ્ટિવિરાગિતા ।
સંજ્ઞાલોપો નિરૂષ્મત્વં સદ્યોમૃત્યુનિદર્શનમ્ ॥ ૧૫॥

અકસ્માચ્ચ સ્રવેદ્યસ્ય વામમક્ષિ નરાધિપ ।
મૂર્ધતશ્ચોત્પતેદ્ધૂમઃ સદ્યોમૃત્યુનિદર્શનમ્ ॥ ૧૬॥

એતાવન્તિ ત્વરિષ્ટાનિ વિદિત્વા માનવોઽઽત્મવાન્ ।
નિશિ ચાહનિ ચાત્માનં યોજયેત્પરમાત્મનિ ॥ ૧૭॥

પ્રતીક્ષમાણસ્તત્કાલં યત્કાલં પ્રતિ તદ્ભવેત્ ।
અથાસ્ય નેષ્ટં મરણં સ્થાતુમિચ્છેદિમાં ક્રિયામ્ ॥ ૧૮॥

સર્વગન્ધાન્ રસાંશ્ચૈવ ધારયેત સમાહિતઃ ।
તથા હિ મૃત્યું જયતિ તત્પરેણાન્તરાત્મના ॥ ૧૯॥

સસાઙ્ખ્યધારણં ચૈવ વિદિત્વા મનુજર્ષભ ।
જયેચ્ચ મૃત્યું યોગેન તત્પરેણાન્તરાત્મના ॥ ૨૦॥

ગચ્છેત્પ્રાપ્યાક્ષયં કૃત્સ્નમજન્મ શિવમવ્યયમ્ ।
શાશ્વતં સ્થાનમચલં દુષ્પ્રાપમકૃતાત્મભિઃ ॥ ૨૧॥

ઇતિ શ્રીમહાભરતે શાન્તિપર્વણિ મોક્ષધર્મપર્વણિ
યાજ્ઞવલ્ક્યજનકસંવાદે સપ્તદશાધિકત્રિશતતમોઽધ્યાયઃ ।

## ૩૧૮/૩૦૬

યાજ્ઞવલ્ક્ય ઉવાચ ।
અવ્યક્તસ્થં પરં યત્તત્પૃષ્ટસ્તેઽહં નરાધિપ ।
પરં ગુહ્યમિમં પ્રશ્નં શ‍ૃણુષ્વાવહિતો નૃપ ॥ ૧॥

યથાર્ષેણેહ વિધિના ચરતાવમતેન હ ।
મયાદિત્યાદવાપ્તાનિ યજૂંષિ મિથિલાધિપ ॥ ૨॥

મહતા તપસા દેવસ્તપિષ્ઠઃ સેવિતો મયા ।
પ્રીતેન ચાહં વિભુના સૂર્યેણોક્તસ્તદાનઘ ॥ ૩॥

વરં વૃણીષ્વ વિપ્રર્ષે યદિષ્ટં તે સુદુર્લભમ્ ।
તત્તે દાસ્યામિ પ્રીતાત્મા મત્પ્રસાદો હિ દુર્લભઃ ॥ ૪॥

તતઃ પ્રનમ્ય શિરસા મયોક્તસ્તપતાં વરઃ ।
યજૂંષિ નોપયુક્તાનિ ક્ષિપ્રમિચ્છામિ વેદિતુમ્ ॥ ૫॥

તતો માં ભગવાનાહ વિતરિષ્યામિ તે દ્વિજ ।
સરસ્વતીહ વાગ્ભૂતા શરીરં તે પ્રવેક્ષ્યતિ ॥ ૬॥

તતો મામાહ ભગવાનાસ્યં સ્વં વિવૃતં કુરુ ।
વિવૃતં ચ તતો મેઽઽસ્યં પ્રવિષ્ટા ચ સરસ્વતી ॥ ૭॥

તતો વિદહ્યમાનોઽહં પ્રવિષ્ટોઽમ્ભસ્તદાનઘ ।
અવિજ્ઞાનાદમર્ષાચ્ચ ભાસ્કરસ્ય મહાત્મનઃ ॥ ૮॥

તતો વિદહ્યમાનં મામુવાચ ભગવાન્ રવિઃ ।
મુહૂર્તં સહ્યતાં દાહસ્તતઃ શીતીભવિષ્યસિ ॥ ૯॥

શીતીભૂતં ચ માં દૃષ્ટ્વા ભગવાનાહ ભાસ્કરઃ ।
પ્રતિષ્ઠાસ્યતિ તે વેદઃ સોત્તરઃ સખિલો દ્વિજ ॥ ૧૦॥

કૃત્સ્નં શતપથં ચૈવ પ્રણેષ્યસિ દ્વિજર્ષભ ।
તસ્યાન્તે ચાપુનર્ભાવે બુદ્ધિસ્તવ ભવિષ્યતિ ॥ ૧૧॥

પ્રાપ્સ્યસે ચ યદિષ્ટં તત્સાઙ્ખ્યયોગેપ્સિતં પદમ્ ।
એતાવદુક્ત્વા ભગવાનસ્તમેવાભ્યવર્તત ॥ ૧૨॥

તતોઽનુવ્યાહૃતં શ્રુત્વા ગતે દેવે વિભાવસૌ ।
ગૃહમાગત્ય સંહૃષ્ટોઽચિન્તયં વૈ સરસ્વતીમ્ ॥ ૧૩॥

તતઃ પ્રવૃત્તાતિશુભા સ્વરવ્યઞ્જનભૂષિતા ।
ઓઙ્કારમાદિતઃ કૃત્વા મમ દેવી સરસ્વતી ॥ ૧૪॥

તતોઽહમર્ઘ્યં વિધિવત્સરસ્વત્યૈ ન્યવેદયમ્ ।

તપતાં ચ વરિષ્ઠાય નિષણ્ણસ્તત્પરાયણઃ ॥ ૧૫॥

તતઃ શતપથં કૃત્સ્નં સહરસ્યં સસઙ્ગ્રહમ્ ।
ચક્રે સપરિશેષં ચ હર્ષેણ પરમેણ હ ॥ ૧૬॥

કૃત્વા ચાધ્યયનં તેષાં શિષ્યાણાં શતમુત્તમમ્ ।
વિપ્રિયાર્થં સશિષ્યસ્ય માતુલસ્ય મહાત્મનઃ ॥ ૧૭॥

તતઃ સશિષ્યેણ મયા સૂર્યેણેવ ગભસ્તિભિઃ ।
વ્યાપ્તો યજ્ઞો મહારાજ પિતુસ્તવ મહાત્મનઃ ॥ ૧૮॥

મિષતો દેવલસ્યાપિ તતોઽર્ધં હૃતવાનહમ્ ।
સ્વવેદદક્ષિણાયાથ વિમર્દે માતુલેન હ ॥ ૧૯॥

સુમન્તુનાથ પૈલેન તથ જૈમિનિના ચ વૈ ।
પિત્રા તે મુનિભિશ્ચૈવ તતોઽહમનુમાનિતઃ ॥ ૨૦॥

દશ પઞ્ચ ચ પ્રાપ્તાનિ યજૂંષ્યર્કાન્મયાનઘ ।
તથૈવ લોમહર્ષાચ્ચ પુરાણમવધારિતમ્ ॥ ૨૧॥

બીજમેતત્પુરસ્કૃત્ય દેવીં ચૈવ સરસ્વતીમ્ ।
સૂર્યસ્ય ચાનુભાવેન પ્રવૃત્તોઽહં નરાધિપ ॥ ૨૨॥

કર્તું શતપથં વેદમપૂર્વં કારિતં ચ મે ।
યથાભિલસિતં માર્ગં તથા તચ્ચોપપાદિતમ્ ॥ ૨૩॥

શિષ્યાણામખિલં કૃત્સ્નમનુજ્ઞાતં સસઙ્ગ્રહમ્ ।
સર્વે ચ શિષ્યાઃ શુચયો ગતાઃ પરમહર્ષિતાઃ ॥ ૨૪॥

શાખાઃ પઞ્ચદશેમાસ્તુ વિદ્યા ભાસ્કરદર્શિતાઃ ।
પ્રતિષ્ઠાપ્ય યથાકામં વેદ્યં તદનુચિન્તયમ્ ॥ ૨૫॥

કિમત્ર બ્રહ્મણ્યમૃતં કિં ચ વેદ્યમનુત્તમમ્ ।
ચિન્તયે તત્ર ચાગત્ય ગન્ધર્વો મામપૃચ્છત ॥ ૨૬॥

વિશ્વાવસુસ્તતો રાજન્વેદાન્તજ્ઞાનકોવિદઃ ।
ચતુર્વિંશતિકાન્પ્રશ્નાન્પૃષ્ટ્વા વેદસ્ય પાર્થિવ ।
પઞ્ચવિંશતિમં પ્રશ્નં પપ્રચ્છાન્વીક્ષિકીં તથા ॥ ૨૭॥

વિશ્વાવિશ્વં તથાશ્વાશ્વં મિત્રં વરુણમેવ ચ ।
જ્ઞાનં જ્ઞેયં તથાજ્ઞો જ્ઞઃ કસ્તપા અપતા તથા ।

સૂર્યાદઃ સૂર્ય ઇતિ ચ વિદ્યાવિદ્યે તથૈવ ચ ॥ ૨૮॥

વેદ્યાવેદ્યં તથા રાજન્નચલં ચલમેવ ચ ।
અપૂર્વમક્ષયં ક્ષય્યમેતત્પ્રશ્નમનુત્તમમ્ ॥ ૨૯॥

અથોક્તશ્ચ મયા રાજન્ રાજા ગન્ધર્વસત્તમઃ ।
પૃષ્ટવાનનુપૂર્વેણ પ્રશ્નમુત્તમમર્થવત્ ॥ ૩૦॥

મુહૂર્તં મૃષ્યતાં તાવદ્યાવદેનં વિચિન્તયે ।
બાઢમિત્યેવ કૃત્વા સ તૂષ્ણીં ગન્ધર્વ આસ્થિતઃ ॥ ૩૧॥

તતોઽન્વચિન્તયમહં ભૂયો દેવીં સરસ્વતીમ્ ।
મનસા સ ચ મે પ્રશ્નો દધ્નો ઘૃતમિવોદ્ધૃતમ્ ॥ ૩૨॥

તત્રોપનિષદં ચૈવ પરિશેષં ચ પાર્થિવ ।
મથ્નામિ મનસા તાત દૃષ્ટ્વા ચાન્વીક્ષિકીં પરામ્ ॥ ૩૩॥

ચતુર્થી રાજશાર્દૂલ વિદ્યૈષા સામ્પરાયિકી ।
ઉદીરિતા મયા તુભ્યં પઞ્ચવિંશેઽધિ ધિષ્ઠિતા ॥ ૩૪॥

અથોક્તસ્તુ મયા રાજન્ રાજા વિશ્વાવસુસ્તદા ।
શ્રૂયતાં યદ્ભવાનસ્માન્પ્રશ્નં સમ્પૃષ્ટવાનિહ ॥ ૩૫॥

વિશ્વાવિશ્વેતિ યદિદં ગન્ધર્વેન્દ્રાનુપૃચ્છસિ ।
વિશ્વાવ્યક્તં પરં વિદ્યાદ્ભૂતભવ્યભયઙ્કરમ્ ॥ ૩૬॥

ત્રિગુણં ગુણકર્તૃત્વાદવિશ્વો નિષ્કલસ્તથા ।
અશ્વસ્તથૈવ મિથુનમેવમેવાનુદૃશ્યતે ॥ ૩૭॥

અવ્યક્તં પ્રકૃતિં પ્રાહુઃ પુરુષેતિ ચ નિર્ગુણમ્ ।
તથૈવ મિત્રં પુરુષં વરુણં પ્રકૃતિં તથા ॥ ૩૮॥

જ્ઞાનં તુ પ્રકૃતિં પ્રાહુર્જ્ઞેયં નિષ્કલમેવ ચ ।
અજ્ઞશ્ચ જ્ઞશ્ચ પુરુષસ્તસ્માન્નિષ્કલ ઉચ્યતે ॥ ૩૯॥

કસ્તપા અતપાઃ પ્રોક્તાઃ કોઽસૌ પુરુષ ઉચ્યતે ।
તપાઃ પ્રકૃતિરિત્યાહુરતપા નિષ્કલઃ સ્મૃતઃ ॥ ૪૦॥

તથૈવાવેદ્યમવ્યક્તં વેદ્યઃ પુરુષ ઉચ્યતે ।
ચલાચલમિતિ પ્રોક્તં ત્વયા તદપિ મે શ◌ૃણુ ॥ ૪૧॥

ચલાં તુ પ્રકૃતિં પ્રાહુઃ કારણં ક્ષેપસર્ગયોઃ ।
અક્ષેપસર્ગયોઃ કર્તા નિશ્ચલઃ પુરુષઃ સ્મૃતઃ ॥ ૪૨॥

અજાવુભાવપ્રજૌ ચ અક્ષયૌ ચાપ્યુભાવપિ ।
અજૌ નિત્યાવુભૌ પ્રાહુરધ્યાત્મગતિનિશ્ચયાઃ ॥ ૪૩॥

અક્ષયત્વાત્પ્રજનને અજમત્રાહુરવ્યયમ્ ।
અક્ષયં પુરુષં પ્રાહુઃ ક્ષયો હ્યસ્ય ન વિદ્યતે ॥ ૪૪॥

ગુણક્ષયત્વાત્પ્રકૃતિઃ કર્તૃત્વાદક્ષયં બુધાઃ ।
એષા તેઽઽન્વીક્ષિકી વિદ્યા ચતુર્થી સામ્પરાયિકી ॥ ૪૫॥

વિદ્યોપેતં ધનં કૃત્વા કર્મણા નિત્યકર્મણિ ।
એકાન્તદર્શના વેદાઃ સર્વે વિશ્વાવસો સ્મૃતાઃ ॥ ૪૬॥

જાયન્તે ચ મ્રિયન્તે ચ યસ્મિન્નેતે યતશ્ચ્યુતાઃ ।
વેદાર્થં યે ન જાનન્તિ વેદ્યં ગન્ધર્વસત્તમ ॥ ૪૭॥

સાઙ્ગોપાઙ્ગાનપિ યદિ પઞ્ચ વેદાનધીયતે ।
વેદવેદ્યં ન જાનીતે વેદભારવહો હિ સઃ ॥ ૪૮॥

યો ઘૃતાર્થી ખરીક્ષીરં મથેદ્ગન્ધર્વસત્તમ ।
વિષ્ઠાં તત્રાનુપશ્યેત ન મણ્ડં નાપિ વા ઘૃતમ્ ॥ ૪૯॥

તથા વેદ્યમવેદ્યં ચ વેદવિદ્યો ન વિન્દતિ ।
સ કેવલં મૂઢમતિર્જ્ઞાનભારવહઃ સ્મૃતઃ ॥ ૫૦॥

દ્રષ્ટવ્યૌ નિત્યમેવૈતૌ તત્પરેણાન્તરાત્મના ।
યથાસ્ય જન્મનિધને ન ભવેતાં પુનઃ પુનઃ ॥ ૫૧॥

અજસ્રં જન્મનિધનં ચિન્તયિત્વા ત્રયીમિમામ્ ।
પરિત્યજ્ય ક્ષયમિહ અક્ષયં ધર્મમાસ્થિતઃ ॥ ૫૨॥

યદા તુ પશ્યતેઽત્યન્તમહન્યહનિ કાશ્યપ ।
તદા સ કેવલીભૂતઃ ષડ્વિંશમનુપશ્યતિ ॥ ૫૩॥

અન્યશ્ચ શશ્વદવ્યક્તસ્તથાન્યઃ પઞ્ચવિંશકઃ ।
તસ્ય દ્વાવનુપશ્યેત તમેકમિતિ સાધવઃ ॥ ૫૪॥

તેનૈતન્નાભિજાનન્તિ પઞ્ચવિંશકમચ્યુતમ્ ।
જન્મમૃત્યુભયાદ્યોગાઃ સાઙ્ખ્યાશ્ચ પરમૈષિણઃ ॥ ૫૫॥

વિશ્વાવસુરુવાચ ।
પઞ્ચવિંશં યદેતત્તે પ્રોક્તં બ્રાહ્મણસત્તમ ।
તથા તન્ન તથા વેતિ તદ્ભવાન્વક્તુમર્હતિ ॥ ૫૬॥

જૈગીષવ્યસ્યાસિતસ્ય દેવલસ્ય ચ મે શ્રુતમ્ ।
પરાશરસ્ય વિપ્રર્ષેર્વાર્ષગણ્યસ્ય ધીમતઃ ॥ ૫૭॥

ભિક્ષોઃ પઞ્ચશિખસ્યાથ કપિલસ્ય શુકસ્ય ચ ।
ગૌતમસ્યાર્ષ્ટિષેણસ્ય ગર્ગસ્ય ચ મહાત્મનઃ ॥ ૫૮॥

નારદસ્યાસુરેશ્ચૈવ પુલસ્ત્યસ્ય ચ ધીમતઃ ।
સનત્કુમારસ્ય તતઃ શુક્રસ્ય ચ મહાત્મનઃ ॥ ૫૯॥

કશ્યપસ્ય પિતુશ્ચૈવ પૂર્વમેવ મયા શ્રુતમ્ ।
તદનન્તરં ચ રુદ્રસ્ય વિશ્વરૂપસ્ય ધીમતઃ ॥ ૬૦॥

દૈવતેભ્યઃ પિતૃભ્યશ્ચ દૈત્યેભ્યશ્ચ તતસ્તતઃ ।
પ્રાપ્તમેતન્મયા કૃત્સ્નં વેદ્યં નિત્યં વદન્ત્યુત ॥ ૬૧॥

તસ્માત્તદ્વૈ ભવદ્બુદ્ધ્યા શ્રોતુમિચ્છામિ બ્રાહ્મણ ।
ભવાન્પ્રબર્હઃ શાસ્ત્રાણાં પ્રગલ્ભશ્ચાતિબુદ્ધિમાન્ ॥ ૬૨॥

ન તવાવિદિતં કિં ચિદ્ભવાઞ્છ્રુતિનિધિઃ સ્મૃતઃ ।
કથ્યતે દેવલોકે ચ પિતૃલોકે ચ બ્રાહ્મણ ॥ ૬૩॥

બ્રહ્મલોકગતાશ્ચૈવ કથયન્તિ મહર્ષયઃ ।
પતિશ્ચ તપતાં શશ્વદાદિત્યસ્તવ ભાષતે ॥ ૬૪॥

સાઙ્ખ્યજ્ઞાનં ત્વયા બ્રહ્મન્નવાપ્તં કૃત્સ્નમેવ ચ ।
તથૈવ યોગજ્ઞાનં ચ યાજ્ઞવલ્ક્ય વિશેષતઃ ॥ ૬૫॥

નિઃસન્દિગ્ધં પ્રબુદ્ધસ્ત્વં બુધ્યમાનશ્ચરાચરમ્ ।
શ્રોતુમિચ્છામિ તજ્જ્ઞાનં ઘૃતં મણ્ડમયં યથા ॥ ૬૬॥

યાજ્ઞવલ્ક્ય ઉવાચ ।
કૃત્સ્નધારિણમેવ ત્વાં મન્યે ગન્ધર્વસત્તમ ।
જિજ્ઞાસસિ ચ માં રાજંસ્તન્નિબોધ યથાશ્રુતમ્ ॥ ૬૭॥

અબુધ્યમાનાં પ્રકૃતિં બુધ્યતે પઞ્ચવિંશકઃ ।

ન તુ બુધ્યતિ ગન્ધર્વ પ્રકૃતિઃ પઞ્ચવિંશકમ્ ॥ ૬૮॥

અનેનાપ્રતિબોધેન પ્રધાનં પ્રવદન્તિ તમ્ ।
સાઙ્ખ્યયોગાશ્ચ તત્ત્વજ્ઞા યથા શ્રુતિનિદર્શનાત્ ॥ ૬૯॥

પશ્યંસ્તથૈવાપશ્યંશ્ચ પશ્યત્યન્યસ્તથાનઘ ।
ષડ્વિંશઃ પઞ્ચવિંશં ચ ચતુર્વિંશં ચ પશ્યતિ ।
ન તુ પશ્યતિ પશ્યંસ્તુ યશ્ચૈનમનુપશ્યતિ ॥ ૭૦॥

પઞ્ચવિંશોઽભિમન્યેત નાન્યોઽસ્તિ પરમો મમ ।
ન ચતુર્વિંશકોઽગ્રાહ્યો મનુજૈર્જ્ઞાનદર્શિભિઃ ॥ ૭૧॥

મત્સ્યેવોદકમન્વેતિ પ્રવર્તતિ પ્રવર્તનાત્ ।
યથૈવ બુધ્યતે મત્સ્યસ્તથૈષોઽપ્યનુબુધ્યતે ।
સસ્નેહઃ સહ વાસાચ્ચ સાભિમાનશ્ચ નિત્યશઃ ॥ ૭૨॥

સ નિમજ્જતિ કાલસ્ય યદૈકત્વં ન બુધ્યતે ।
ઉન્મજ્જતિ હિ કાલસ્ય મમત્વેનાભિસંવૃતઃ ॥ ૭૩॥

યદા તુ મન્યતેઽન્યોઽહમન્ય એષ ઇતિ દ્વિજઃ ।
તદા સ કેવલીભૂતઃ ષડ્વિંશમનુપશ્યતિ ॥ ૭૪॥

અન્યશ્ચ રાજન્નવરસ્તથાન્યઃ પઞ્ચવિંશકઃ ।
તત્સ્થત્વાદનુપશ્યન્તિ એક એવેતિ સાધવઃ ॥ ૭૫॥

તેનૈતન્નાભિનન્દન્તિ પઞ્ચવિંશકમચ્યુતમ્ ।
જન્મમૃત્યુભયાદ્ભીતા યોગાઃ સાઙ્ખ્યાશ્ચ કાશ્યપ ।
ષડ્વિંશમનુપશ્યન્તિ શુચયસ્તત્પરાયણાઃ ॥ ૭૬॥

યદા સ કેવલીભૂતઃ ષડ્વિંશમનુપશ્યતિ ।
તદા સ સર્વવિદ્વિદ્વાન્ન પુનર્જન્મ વિન્દતિ ॥ ૭૭॥

એવમપ્રતિબુદ્ધશ્ચ બુધ્યમાનશ્ચ તેઽનઘ ।
બુદ્ધશ્ચોક્તો યથાતત્ત્વં મયા શ્રુતિનિદર્શનાત્ ॥ ૭૮॥

પશ્યાપશ્યં યોઽનુપશ્યેત્ક્ષેમં તત્ત્વં ચ કાશ્યપ ।
કેવલાકેવલં ચાદ્યં પઞ્ચવિંશાત્પરં ચ યત્ ॥ ૭૯॥

વિશ્વાવસુરુવાચ ।
તથ્યં શુભં ચૈતદુક્તં ત્વયા ભોઃ

સમ્યક્ક્ષેમ્યં દેવતાદ્યં યથાવત્ ।
સ્વસ્ત્યક્ષયં ભવતશ્ચાસ્તુ નિત્યં
બુદ્ધ્યા સદા બુદ્ધિયુક્તં નમસ્તે ॥ ૮૦॥

યાજ્ઞવલ્ક્ય ઉવાચ ।
એવમુક્ત્વા સમ્પ્રયાતો દિવં સ
વિભ્રાજન્વૈ શ્રીમતા દર્શનેન ।
તુષ્ટશ્ચ તુષ્ટ્યા પરયાભિનન્દ્ય
પ્રદક્ષિણં મમ કૃત્વા મહાત્મા ॥ ૮૧॥

બ્રહ્માદીનાં ખેચરાણાં ક્ષિતૌ ચ
યે ચાધસ્તાત્સંવસન્તે નરેન્દ્ર ।
તત્રૈવ તદ્દર્શનં દર્શયન્વૈ
સમ્યક્ક્ષેમ્યં યે પથં સંશ્રિતા વૈ ॥ ૮૨॥

સાઙ્ખ્યાઃ સર્વે સાઙ્ખ્યધર્મે રતાશ્ ચ
તદ્વદ્યોગા યોગધર્મે રતાશ્ચ ।
યે ચાપ્યન્યે મોક્ષકામા મનુષ્યા-
સ્તેષામેતદ્દર્શનં ંજ્ઞાનદૃષ્ટમ્ ॥ ૮૩॥

જ્ઞાનાન્મોક્ષો જાયતે પૂરુષાણાં
નાસ્ત્યજ્ઞાનાદેવમાહુર્નરેન્દ્ર ।
તસ્માજ્જ્ઞાનં તત્ત્વતોઽન્વેષિતવ્યં
યેનાત્માનં મોક્ષયેજ્જન્મમૃત્યોઃ ॥ ૮૪॥

પ્રાપ્ય જ્ઞાનં બ્રાહ્મણાત્ક્ષત્રિયાદ્વા
વૈશ્યાચ્છૂદ્રાદપિ નીચાદભીક્ષ્ણમ્ ।
શ્રદ્ધાતવ્યં શ્રદ્ધાનેન નિત્યં
ન શ્રદ્ધિનં જન્મમૃત્યૂ વિશેતામ્ ॥ ૮૫॥

સર્વે વર્ણા બ્રાહ્મણા બ્રહ્મજાશ્ચ
સર્વે નિત્યં વ્યાહરન્તે ચ બ્રહ્મ ।
તત્ત્વં શાસ્ત્રં બ્રહ્મબુદ્ધ્યા બ્રવીમિ
સર્વં વિશ્વં બ્રહ્મ ચૈતત્સમસ્તમ્ ॥ ૮૬॥

બ્રહ્માસ્યતો બ્રાહ્મણાઃ સમ્પ્રસૂતા
બાહુભ્યાં વૈ ક્ષત્રિયાઃ સમ્પ્રસૂતાઃ ।

નાભ્યાં વૈશ્યાઃ પાદતશ્ચાપિ શૂદ્રાઃ
    સર્વે વર્ણા નાન્યથા વેદિતવ્યાઃ ॥ ૮૭॥

અજ્ઞાનતઃ કર્મ યોનિં ભજન્તે
    તાં તાં રાજંસ્તે યથા યાન્ત્યભાવમ્ ।
તથા વર્ણા જ્ઞાનહીનાઃ પતન્તે
    ઘોરાદજ્ઞાનાત્પ્રાકૃતં યોનિજાલમ્ ॥ ૮૮॥

તસ્માજ્જ્ઞાનં સર્વતો માર્ગિતવ્યં
    સર્વત્રસ્થં ચૈતદુક્તં મયા તે ।
તસ્થૌ બ્રહ્મા તસ્થિવાંશ્ચાપરો ય-
    સ્તસ્મૈ નિત્યં મોક્ષમાહુર્દ્વિજેન્દ્રાઃ ॥ ૮૯॥

યત્તે પૃષ્ટં તન્મયા ચોપદિષ્ટં
    યાથાતથ્યં તદ્વિશોકો ભવસ્વ ।
રાજન્ ગચ્છસ્વૈતદર્થસ્ય પારં
    સમ્યક્પ્રોક્તં સ્વસ્તિ તેઽસ્ત્વત્ર નિત્યમ્ ॥ ૯૦॥

ભીષ્મ ઉવાચ ।
સ એવમનુશાસ્તસ્તુ યાજ્ઞવલ્ક્યેન ધીમતા ।
પ્રીતિમાનભવદ્રાજા મિથિલાધિપતિસ્તદા ॥ ૯૧॥

ગતે મુનિવરે તસ્મિન્કૃતે ચાપિ પ્રદક્ષિણે ।
દૈવરાતિર્નરપતિરાસીનસ્તત્ર મોક્ષવિત્ ॥ ૯૨॥

ગોકોટિં સ્પર્શયામાસ હિરણ્યસ્ય તથૈવ ચ ।
રત્નાઞ્જલિમથૈકં ચ બ્રાહ્મણેભ્યો દદૌ તદા ॥ ૯૩॥

વિદેહરાજ્યં ચ તથા પ્રતિષ્ઠાપ્ય સુતસ્ય વૈ ।
યતિધર્મમુપાસંશ્ચાપ્યવસન્મિથિલાધિપઃ ॥ ૯૪॥

સાઙ્ખ્યજ્ઞાનમધીયાનો યોગશાસ્ત્રં ચ કૃત્સ્નશઃ ।
ધર્માધર્મૌ ચ રાજેન્દ્ર પ્રાકૃતં પરિગર્હયન્ ॥ ૯૫॥

અનન્તમિતિ કૃત્વા સ નિત્યં કેવલમેવ ચ ।
ધર્માધર્મૌ પુણ્યપાપે સત્યાસત્યે તથૈવ ચ ॥ ૯૬॥

જન્મમૃત્યૂ ચ રાજેન્દ્ર પ્રાકૃતં તદચિન્તયત્ ।
બ્રહ્માવ્યક્તસ્ય કર્મેદમિતિ નિત્યં નરાધિપ ॥ ૯૭॥

પશ્યન્તિ યોગાઃ સાઙ્ખ્યાશ્ચ સ્વશાસ્ત્રકૃતલક્ષણાઃ ।
ઇષ્ટાનિષ્ટવિયુક્તં હિ તસ્થૌ બ્રહ્મ પરાત્પરમ્ ।
નિત્યં તમાહુર્વિદ્વાંસઃ શુચિસ્તસ્માચ્છુચિર્ભવ ॥ ૯૮॥

દીયતે યચ્ચ લભતે દત્તં યચ્ચાનુમન્યતે ।
દદાતિ ચ નરશ્રેષ્ઠ પ્રતિગૃહ્ણાતિ યચ્ચ હ ।
દદાત્યવ્યક્તમેવૈતત્પ્રતિગૃહ્ણાતિ તચ્ચ વૈ ॥ ૯૯॥

આત્મા હ્યેવાત્મનો હ્યેકઃ કોઽન્યસ્ત્વત્તોઽધિકો ભવેત્ ।
એવં મન્યસ્વ સતતમન્યથા મા વિચિન્તય ॥ ૧૦૦॥

યસ્યાવ્યક્તં ન વિદિતં સગુણં નિર્ગુણં પુનઃ ।
તેન તીર્થાનિ યજ્ઞાશ્ચ સેવિતવ્યાવિપશ્ચિતા ॥ ૧૦૧॥

ન સ્વાધ્યાયૈસ્તપોભિર્વા યજ્ઞૈર્વા કુરુનન્દન ।
લભતેઽવ્યક્તસંસ્થાનં જ્ઞાત્વાવ્યક્તં મહીપતે ॥ ૧૦૨॥

તથૈવ મહતઃ સ્થાનમાહઙ્કારિકમેવ ચ ।
અહઙ્કારાત્પરં ચાપિ સ્થાનાનિ સમવાપ્નુયાત્ ॥ ૧૦૩॥

યે ત્વવ્યક્તાત્પરં નિત્યં જાનતે શાસ્ત્રતત્પરાઃ ।
જન્મમૃત્યુવિયુક્તં ચ વિયુક્તં સદસચ્ચ યત્ ॥ ૧૦૪॥

એતન્મયાઽઽપ્તં જનકાત્પુરસ્તાત્
    તેનાપિ ચાપ્તં નૃપ યાજ્ઞવલ્ક્યાત્ ।
જ્ઞાનં વિશિષ્ટં ન તથા હિ યજ્ઞા
    જ્ઞાનેન દુર્ગં તરતે ન યજ્ઞૈઃ ॥ ૧૦૫॥

દુર્ગં જન્મ નિધનં ચાપિ રાજન્
    ન ભૂતિકં જ્ઞાનવિદો વદન્તિ ।
યજ્ઞૈસ્તપોભિર્નિયમૈર્વ્રતૈશ્ચ
    દિવં સમાસાદ્ય પતન્તિ ભૂમૌ ॥ ૧૦૬॥

તસ્માદુપાસસ્વ પરં મહચ્છુચિ
    શિવં વિમોક્ષં વિમલં પવિત્રમ્ ।
ક્ષેત્રજ્ઞવિત્પાર્થિવ જ્ઞાનયજ્ઞ-
    મુપાસ્ય વૈ તત્ત્વમૃષિર્ભવિષ્યસિ ॥ ૧૦૭॥

ઉપનિષદમુપાકરોત્તદા વૈ
    જનકનૃપસ્ય પુરા હિ યાજ્ઞવલ્ક્યઃ ।
યદુપગણિતશાશ્વતાવ્યયં ત-
    ચ્છુભમમૃતત્વમશોકમૃચ્છતીતિ ॥ ૧૦૮॥

ઇતિ શ્રીમહાભરતે શાન્તિપર્વણિ મોક્ષધર્મપર્વણિ
યાજ્ઞવલ્ક્યજનકસંવાદે અષ્ટાદશાધિકત્રિશતતમોऽધ્યાયઃ ।

ઇતિ યાજ્ઞવલ્ક્યગીતા સમાપ્તા ।

Yajnvalkya Gita From Mahabharat Shanti Parva Ch 310-318

From BORI critical edition expanded to include text from
https://archive.org/details/mahabharat05ramauoft
The verse numbering differs.
The first adhyAya number is from the book, the
second is from Bori critical edition.

---

*Yajnvalkya Gita From Mahabharat Shanti Parva*
pdf was typeset on December 29, 2022

Please send corrections to *sanskrit@cheerful.com*